# Shri Bala Namasmaranapurvakasvarupa DhyAnam

# श्रीबालानामस्मरणपूर्वकस्वरूपध्यानम्

## Document Information

Text title : bAlAnAmasmaraNapUrvakasvarUpadhyAnam

File name : bAlAnAmasmaraNapUrvakasvarUpadhyAnam.itx

Category : devii, dashamahAvidyA, devI, dhyAnam

Location : doc_devii

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description/comments : bAlAsaparyA saparyAkrama-nAmAvalI-stotrAdisaNgrahaH

Latest update : March 21, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 22, 2020

*sanskritdocuments.org*

# श्रीबालानामस्मरणपूर्वकस्वरूपध्यानम्

कल्याणी त्रिपुरा बाला माया त्रिपुरसुन्दरी ।
सुन्दरी सर्वसौभाग्यवती ह्रींङ्काररूपिणी ॥ १॥

ऐङ्कारी सर्वजननी क्लीङ्कारी परमेश्वरी ।
सौःकारी सर्वशक्त्याढ्या त्र्यक्षरी दिव्यगन्धिनी ॥ २॥

संविदानन्दलहरी श्रीविद्या त्रिपुरेश्वरी ।
गुप्ता गुप्तपतरा नित्या नित्या षोडशकावृता ॥ ३॥

भक्तानुरक्ता रक्ताङ्गी शिवा सर्वारुणा शुभा ।
मोहिनी परमानन्दा कामेशी तरुणी कला ॥ ४॥

पद्मावती भगवती पद्मरागकिरीटिनी ।
रक्तवस्त्रा रक्तभूषा रक्तगन्धानुलेपना ॥ ५॥

सौगन्धिकमिलद्वेणी मन्त्रिणी मन्त्रपुष्पिणी ।
तत्त्वासना तत्त्वमयी सिद्धान्तःपुरवासिनी ॥ ६॥

श्रीवाणीड्या महादेवी कौलिनी परदेवता ।
कैवल्यरेखा वशिनी सर्वेशी सर्वमङ्गला ॥ ७॥

नारायणी वेदवेद्या सर्वसम्पत्प्रदा सती ।
चतुर्भुजा चन्द्रचूडा पुराणागमबोधिता ॥ ८॥

भूतेश्वरी भूतमयी पञ्चाशद्वर्णरूपिणी ।
सर्वमङ्गलमाङ्गल्या कामाक्षी कामदायिनी ॥ ९॥

किङ्करीभूतगीर्वाणी सुधापानविनोदिनी ।
आधारवीथीपथिका स्वाधिष्ठानसमाश्रिता ॥ १०॥

मणिपूरसमासीना अनाहतनिवासिनी ।
विशुद्धिचक्रनिलया आज्ञाचक्रनिवासिनी ॥ ११॥

अष्टत्रिंशत्कलामूर्तिः सुषुम्नागारमध्यगा ।
योगीश्वरमुनिध्येया परब्रह्मस्वरूपिणी ॥ १२॥

दिक्पालशक्तिसंयुक्ता सर्वाशापरिपूरका ।
अनङ्गकुसुमादीड्या वाग्देव्यष्टकसंवृता ॥ १३॥

सर्वसौभाग्यदेशानी मात्रष्टकसमावृता ।
भैरवष्टकसंसेव्या सर्वाभीष्टार्थसाधिका ॥ १४॥

योगिनीषट्कसंसेव्या सर्वरक्षाकराधिपा ।
रतिप्रीतिविजयाख्यत्रिशक्तिगुरुसेविता ॥ १५॥

सर्वसिद्धिप्रदेशानी सर्वानन्दमयाधिपा ।
रहःपूजासमालोला बिन्दुस्थलमनोहरा ॥ १६॥

त्रिकोणमध्यनिलया षट्कोणपुरवासिनी ।
वसुपत्रद्वयावासा भूपुरद्वयमध्यगा ॥ १७॥

शिवकामेश्वराङ्कस्थकामेश्वर्यङ्कवासिनी ।
कामेश्वरीसमाकारा फुल्लकल्हारमध्यगा ॥ १८॥

पुस्तकाभीतिवरदजपमालालसत्करा ।
तरुणारुणदेहाभा दिव्याभरणभूषिता ॥ १९॥

बन्धूककुसुमप्रख्या बाललीलाविनोदिनी ।
काश्मीरकर्दमालिप्ततनुच्छायाविराजिता ॥ २०॥

सपर्याचारनिरतगुरुमण्डलसेविता ।
चतुर्वर्गप्रदानोत्क नित्यकल्याणरूपिणी ॥ २१॥

एवं ध्याता हृदि सदा परम्बा बालरूपिणी ।
देवि ! भाग्यवशादत्र सन्निधत्से चिदाकृतिः ॥ २२॥

इति श्रीबालानामस्मरणपूर्वकस्वरूपध्यानं सम्पूर्णम् ।

Proofread by PSA Easwaran

*Shri Bala Namasmaranapurvakasvarupa DhyAnam*

pdf was typeset on March 22, 2020

Please send corrections to *sanskrit@cheerful.com*